# Vijnanabhairava Tantra



Published by
MKG Digital University of Sanatan Dharma

# Vijnanabhairava Tantra

# विज्ञानभैरव तन्त्र

Published by

MKG Digital University of Sanatan Dharma

Vijnanabhairava Tantra— विज्ञानभैरव तन्त्र
First Digital Edition, 2026

Published by
MKG Digital University of Sanatan Dharma

This digital edition presents the Sanskrit verses of the Vijnanabhairava Tantra without interpretation, commentary, or translation.
The underlying ancient Sanskrit work is presented as a historical and spiritual text. This edition has been independently typeset and digitally formatted for free access, reading, study, sharing, and reuse.

License: CC0 — No Rights Reserved

This digital edition is dedicated to the public domain to the fullest extent permitted by law.
You are free to copy, reproduce, modify, adapt, distribute, publish, share, and use this edition for any purpose, including commercial purposes, without requesting permission.

Edition: First Digital Edition
Language: Sanskrit
Format: Digital PDF
Price: Free
This edition is provided freely for reading, study, education, sharing, and unrestricted reuse.

श्री देव्युवाच । shri devy uvacha ।

श्रुतं देव मया सर्वं रुद्रयामलसम्भवम् ।
त्रिकभेदमशेषेण सारात्सारविभागशः ॥ १ ॥

shrutam deva maya sarvam rudrayamalasambhavam
trikabhedamasheshen saratsaravibhagashah 1

अद्यापि न निवृत्तो मे संशयः परमेश्वर ।
किं रूपं तत्त्वतो देव शब्दराशिकलामयम् ॥ २ ॥

adyapi na nivritto me sanshayah parameshvara
kim rupam tattvato deva shabdarashikalamayam 2

किं वा नवात्मभेदेन भैरवे भैरवाकृतौ ।
त्रिशिरोभेदभिन्नं वा किं वा शक्तित्रयात्मकम् ॥ ३ ॥

kim va navatmabhedena bhairave bhairavakritau
trishirobhedabhinnam va kim va shaktitrayatmakam 3

नादबिन्दुमयं वापि किं चन्द्रार्धनिरोधिकाः ।
चक्रारूढमनच्कं वा किं वा शक्तिस्वरूपकम् ॥ ४ ॥

nadabindumayam vapi kim chandrardhanirodhikah
chakrarudham anachkam va kim va shaktisvarupakam 4

परापरायाः सकलमपरायाश्च वा पुनः ।
पराया यदि तद्वत्स्यात्परत्वं तद् विरुध्यते ॥ ५ ॥

paraparayah sakalam aparayash cha va punah
paraya yadi tadvat syat paratvam tad virudhyate 5

न हि वर्णविभेदेन देहभेदेन वा भवेत् ।
परत्वं निष्कलत्वेन सकलत्वे न तद् भवेत् ॥ ६ ॥

na hi varnabhedena dehabhedena va bhavet
paratvam nishkalatvena sakalatve na tad bhavet 6

प्रसादं कुरु मे नाथ निःशेषं छिन्धि संशयम् ।

prasadam kuru me natha nihshesham chhindhi sanshayam

भैरव उवाच । bhairava uvacha ।

साधु साधु त्वया पृष्टं तन्त्रसारमिदं प्रिये ॥ ७ ॥

sadhu sadhu tvaya prishtam tantrasaram idam priye 7

गूहनीयतमं भद्रे तथापि कथयामि ते ।
यत्किञ्चित्सकलं रूपं भैरवस्य प्रकीर्तितम् ॥ ८ ॥

guhaniyatamam bhadre tathapi kathayami te
yatkinchit sakalam rupam bhairavasya prakirtitam 8

तदसारतया देवि विज्ञेयं शक्रजालवत् ।
मायास्वप्नोपमं चैव गन्धर्वनगरभ्रमम् ॥ ९ ॥

tadasarataya devi vijneyam shakrajala vat
mayasvapnopamam chaiva gandharvanagarabhramam 9

ध्यानार्थं भ्रान्तबुद्धीनां क्रियाडम्बरवर्तिनाम् ।
केवलं वर्णितं पुंसां विकल्पनिहतात्मनाम् ॥ १० ॥

dhyanartham bhrantabuddhinam kriyadambaravartinam
kevalam varnitam pumsam vikalpanihatatmanam 10

तत्त्वतो न नवात्मासौ शब्दराशिर्न भैरवः ।
न चासौ त्रिशिरा देवो न च शक्तित्रयात्मकः ॥ ११ ॥

tattvato na navatmasau shabdarashir na bhairavah
na chasau trishira devo na cha shaktitrayatmakah 11

नादबिन्दुमयो वापि न चन्द्रार्धनिरोधिकाः ।
न चक्रक्रमसम्भिन्नो न च शक्तिस्वरूपकः ॥ १२ ॥

nadabindumayo vapi na chandrardhanirodhikah
na chakrakramasambhinno na cha shaktisvarupakah 12

अप्रबुद्धमतीनां हि एता बलविभीषिकाः ।
मातृमोदकवत्सर्वं प्रवृत्त्यर्थमुदाहृतम् ॥ १३ ॥

aprabuddhamatinam hi eta balavibhishikah
matrimodakavat sarvam pravrittyartham udahritam 13

दिक्कालकलनोन्मुक्ता देशोद्देशाविशेषिणी ।
व्यपदेष्टुमशक्यासावकथ्या परमार्थतः ॥ १४ ॥

dikkalakalAnonmukta deshoddeshavisheshini
vyapadeshtum ashakyasav akathya paramarthatah 14

अन्तःस्वानुभवानन्दा विकल्पोन्मुक्तगोचरा ।
यावस्था भरिताकारा भैरवी भैरवात्मनः ॥ १५ ॥

antahsvanubhavananda vikalponmuktagochara
yavastha bharitakara bhairavi bhairavatmanah 15

तद् वपुस्तत्त्वतो ज्ञेयं विमलं विश्वपूरणम् ।
एवंविधे परे तत्त्वे कः पूज्यः कश्च तृप्यति ॥ १६ ॥

tad vapus tattvato jneyam vimalam vishvapuranam
evamvidhe pare tattve kah pujyah kash cha tripyati 16

एवंविधा भैरवस्य यावस्था परिगीयते ।
सा परा पररूपेण परा देवी प्रकीर्तिता ॥ १७ ॥

evamvidha bhairavasya yavastha parigiyate
sa para pararupena para devi prakirtita 17

शक्तिशक्तिमतोर्यद्वदभेदः सर्वदा स्थितः ।
अतस्तद्धर्मधर्मित्वात्परा शक्तिः परात्मनः ॥ १८ ॥

shaktishaktimator yadvad abhedah sarvada sthitah
atas taddharmadharmitvat para shaktih paratmanah 18

न वह्नेर् दाहिका शक्तिर्व्यतिरिक्ता विभाव्यते ।
केवलं ज्ञानसत्तायां प्रारम्भोऽयं प्रवेशने ॥ १९ ॥

na vahner dahika shaktir vyatirikta vibhavyate
kevalam jnanasattayam prarambho yam praveshane 19

शक्त्यवस्थाप्रविष्टस्य निर्विभागेन भावना ।
तदासौ शिवरूपी स्यात् शैवी मुखमिहोच्यते ॥ २० ॥

shaktyavasthapraviShtasya nirvibhagena bhavana
tadasau shivarupi syat shaivi mukham ihocyate 20

यथालोकेन दीपस्य किरणैर्भास्करस्य च ।
ज्ञायते दिग्विभागादि तद्वच्छक्त्या शिवः प्रिये ॥ २१ ॥

yathalokena dipasya kiranair bhaskarasya cha
jnayate digvibhagadi tadvach chaktya shivah priye 21

श्री देव्युवाच । shri devy uvacha ।

देवदेव त्रिशूलाङ्क कपालकृतभूषण ।
दिग्देशकाळशून्या च व्यपदेशविवर्जिता ॥ २२ ॥

devadeva trishulangka kapalakr tabhushana
digdeshakalashunya cha vyapadeshavivarjita 22

यावस्था भरिताकारा भैरवस्योपलभ्यते ।
कै रूपैर्मुखं तस्य परा देवि कथं भवेत् ।
यथा सम्यगहं वेद्मि तथा मे ब्रूहि भैरव ॥ २३ ॥

yavastha bharitakara bhairavasyopalabhyate
kai rupair mukham tasya para devi katham bhavet
yatha samyag aham vedmi tatha me bruhi bhairava 23

भैरव उवाच । bhairava uvacha ।

ऊर्ध्वे प्राणो ह्यधो जीवो विसर्गात्मा परोच्चरेत् ।
उत्पत्तिद्वितयस्थाने भरणाद्भरिता स्थितिः ॥ २४ ॥

urdhve prano hy adho jivo visargatma paroccharet
utpattidvitayasthane bharanad bharita sthitih 24

मरुतोऽन्तर्बहिर्वापि वियद्युग्मानिवर्तनात् ।
भैरव्या भैरवस्येत्थं भैरवि व्यज्यते वपुः ॥ २५ ॥

maruto antar bahir vapi viyadyugmanivartanat
bhairavya bhairavasyettham bhairavi vyajyate vapuh 25

न व्रजेन्न विशेच्छक्तिर्मरुद्रूपा विकासिते ।
निर्विकल्पतया मध्ये तया भैरवरूपता ॥ २६ ॥

na vrajen na vishech chaktir marudrupa vikasite
nirvikalpataya madhye taya bhairavarupata 26

कुम्भिता रेचिता वापि पूरिता वा यदा भवेत् ।
तदन्ते शान्तनामा स्यात् शक्त्या शान्तः प्रकाशते ॥ २७ ॥

kumbhita rechita vapi purita va yada bhavet
tadante shantanama syat shaktya shantah prakashate 27

आमूलात्किरणाभासां सूक्ष्मात्सूक्ष्मतरात्मिकाम् ।
चिन्तयेत्तां द्विषट्कान्ते श्याम्यन्तीं भैरवोदयः ॥ २८ ॥

amulat kiranabhasam sukshmat sukshmataratmikam
chintayet tam dvishatkante shyamyantim bhairavodayah 28

उद्गच्छन्तीं तडिद्रूपां प्रतिचक्रं क्रमात्क्रमम् ।
ऊर्ध्वं मुष्टित्रयं यावत् तावदन्ते महोदयः ॥ २९ ॥

udgachchantim tadidrupam pratisch akram kramam
urdhvam mushtitrayam yavat tavad ante mahodayah 29

क्रमद्वादशकं सम्यग्द्वादशाक्षरभेदितम् ।
स्थूलसूक्ष्मपरस्थित्या मुक्त्वा मुक्त्वान्ततः शिवः ॥ ३० ॥

kramadvadashakam samyag dvadashaksharabheditam
sthulasukshmaparasthitya muktva muktvantatah shivah 30

तयापूर्याशु मूर्धान्तं भङ्क्त्वा भ्रूक्षेपसेतुना ।
निर्विकल्पं मनः कृत्वा सर्वोर्ध्वे सर्वगोदयः ॥ ३१ ॥

tayapuryashu murdhantam bhanktva bhrukshepasetuna
nirvikalpam manah kritva sarvordhve sarvodg amah 31

शिखिपक्षैश्चित्ररूपैर्मण्डलैः शून्यपञ्चकम् ।
ध्यायतोऽनुत्तरे शून्ये प्रवेशो हृदये भवेत् ॥ ३२ ॥

shikhipaksh aish chitrarupair mandalaih shunyapanchakam
dhyayato anuttare shunye pravesho hridaye bhavet 32

ईदृशेन क्रमेणैव यत्र कुत्रापि चिन्तना ।
शून्ये कुड्ये परे पात्रे स्वयम्लीना वरप्रदा ॥ ३३ ॥

id rishena kramenaiva yatra kutrapi chintana
shunye kudye pare patre svayam lina varaprada 33

कपालान्तर्मनो न्यस्य तिष्ठन्मीलितलोचनः ।
क्रमेण मनसो दार्ढ्याल्लक्षयेल्लक्ष्यमुत्तमम् ॥ ३४ ॥

kapalantarmano nyasya tishthan militalochanah
kramena manaso dardhyal lakshayet lakshyam uttamam 34

मध्यनाडी मध्यसंस्था बिससूत्राभरूपया ।
ध्यातान्तर्व्योमया देव्या तया देवः प्रकाशते ॥ ३५ ॥

madhyanadi madhyasamstha bisasutrabharupaya
dhyatantarvyomaya devya taya devah prakashate 35

कररुद्धदृगस्त्रेण भ्रूभेदाद्द्वाररोधनात् ।
दृष्टे बिन्दौ क्रमाल्लीने तन्मध्ये परमा स्थितिः ॥ ३६ ॥

kararuddhadrigas trena bhrubhedad dvararodhanat
drishte bindau kramal line tanmadhye parama sthitih 36

धामान्तःक्षोभसम्भूतसूक्ष्माग्नितिलकाकृतिम् ।
बिन्दुं शिखान्ते हृदये लयान्ते ध्यायतो लयः ॥ ३७ ॥

dhamantah kshobhasambhutasukshmagnitilakakritim
bindum shikhante hridaye layante dhyayato layah 37

अनाहते पात्रकर्णेऽभग्नशब्दे सरिद्द्रुते ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥ ३८ ॥

ana hate patrakarne abhagnashabde sariddrute
shabdabrahmani nishnatah param brahmadhigachchhati 38

प्रणवादिसमुच्चारात्प्लुतान्ते शून्यभावनात् ।
शून्यया परया शक्त्या शून्यतामेति भैरवि ॥ ३९ ॥

pranavadisamuchcharat plutante shunyabhavanat
shunyaya paraya shaktya shunyatam eti bhairavi 39

यस्य कस्यापि वर्णस्य पूर्वान्तावनुभावयेत् ।
शून्यया शून्यभूतोऽसौ शून्याकारः पुमान्भवेत् ॥ ४० ॥

yasya kasyapi varnasya purvantav anubhavayet
shunyaya shunyabhuto asau shunyakarah puman bhavet 40

तन्त्र्यादिवाद्यशब्देषु दीर्घेषु क्रमसंस्थितेः ।
अनन्यचेताः प्रत्यन्ते परव्योमवपुर्भवेत् ॥ ४१ ॥

tantryadivadyashabdeshu dirgheshu kramasthiteh
ananyachetah pratyante paravyomavapur bhavet 41

पिण्डमन्त्रस्य सर्वस्य स्थूलवर्णक्रमेण तु ।
अर्धेन्दुबिन्दुनादान्तः शून्योच्चाराद्भवेच्छिवः ॥ ४२ ॥

pindamantrasya sarvasya sthulavarnakramena tu
ardhendubindunadantah shunyoccharad bhavec chivah 42

निजदेहे सर्वदिक्कं युगपद्भावयेद्वियत् ।
निर्विकल्पमनास्तस्य वियत्सर्वं प्रवर्तते ॥ ४३ ॥

nijadehe sarvadikkam yugapad bhavayed viyat
nirvikalpamanas tasya viyat sarvam pravartate 43

पृष्ठशून्यं मूलशून्यं युगपद्भावयेच्च यः ।
शरीरनिरपेक्षिण्या शक्त्या शून्यमना भवेत् ॥ ४४ ॥

prishthashunyam mulashunyam yugapad bhavayec cha yah
shariranirapekshinya shaktya shunyamana bhavet 44

पृष्ठशून्यं मूलशून्यं हृच्छून्यं भावयेत्स्थिरम् ।
युगपन्निर्विकल्पत्वान्निर्विकल्पोदयस्ततः ॥ ४५ ॥

prishthashunyam mulashunyam hrichchhunyam bhavayet sthiram
yugapan nirvikalpatvan nirvikalpodayas tatah 45

तनूदेशे शून्यतैव क्षणमात्रं विभावयेत् ।
निर्विकल्पं निराधारं निर्विकल्पस्वरूपभाक् ॥ ४६ ॥

tanudese shunyataiva kshanamatram vibhavayet
nirvikalpam niradharam nirvikalpasvarupabhak 46

सर्वं देहगतं द्रव्यं वियद्व्याप्तं मृगेक्षणे ।
विभावयेत् ततस्तस्य भावना सा स्थिरा भवेत् ॥ ४७ ॥

sarvam dehag atam dravyam viyadvyaptam mrigekshane
vibhavayet tatas tasya bhavana sa sthira bhavet 47

देहान्तरे त्वग्विभागं भित्तिभूतं विचिन्तयेत् ।
न किञ्चिदन्तरे तस्य ध्यायन्नध्येयभाग्भवेत् ॥ ४८ ॥

dehantare tvagvibhagam bhittibhutam vichintayet
na kinchid antare tasya dhyayann adhyeyabhag bhavet 48

हृद्याकाशे निलीनाक्षः पद्मसम्पुटमध्यगः ।
अनन्यचेताः सुभगे परं सौभाग्यमाप्नुयात् ॥ ४९ ॥

hridyakase nilinakshah padmasamputamadhyagah
ananyachetah subhage param saubhagyam apnuyat 49

सर्वतः स्वशरीरस्य द्वादशान्ते मनोलयात् ।
दृढबुद्धेर्दृढीभूतं तत्त्वलक्ष्यं प्रवर्तते ॥ ५० ॥

sarvatah svasharirasya dvadashante manolayat
dridhabuddher dridhibhutam tattvalakshyam pravartate 50

यथा तथा यत्र तत्र द्वादशान्ते मनः क्षिपेत् ।
प्रतिक्षणं क्षीणवृत्तेर्वैलक्षण्यं दिनैर्भवेत् ॥ ५१ ॥

yatha tatha yatra tatra dvadashante manah kshipet
pratikshanam kshinavritter vailakshanyam dinair bhavet 51

कालाग्निना कालपदादुत्थितेन स्वकं पुरम् ।
प्लुष्टं विचिन्तयेदन्ते शान्ताभासस्तदा भवेत् ॥ ५२ ॥

kalagnina kalapadad utthitena svakam puram
plushtam vichintayed ante shantabhasas tada bhavet 52

एवमेव जगत्सर्वं दग्धं ध्यात्वा विकल्पतः ।
अनन्यचेतसः पुंसः पुम्भावः परमो भवेत् ॥ ५३ ॥

evam eva jagat sarvam dagdham dhyatva vikalpatah
ananyachetasah pumsah pumbhavah paramo bhavet 53

स्वदेहे जगतो वापि सूक्ष्मसूक्ष्मतराणि च ।
तत्त्वानि यानि निलयं ध्यात्वान्ते व्यज्यते परा ॥ ५४ ॥

svadehe jagato vapi sukshmasukshmatarani cha
tattvani yani nilayam dhyatvante vyajyate para 54

पीनां च दुर्बलां शक्तिं ध्यात्वा द्वादशगोचरे ।
प्रविश्य हृदये ध्यायन्मुक्तः स्वातन्त्र्यमाप्नुयात् ॥ ५५ ॥

pinam cha durbalam shaktim dhyatva dvadashagochare
pravishya hridaye dhyayan muktah svatantryam apnuyat 55

भुवनाध्वादिरूपेण चिन्तयेत् क्रमशोऽखिलम् ।
स्थूलसूक्ष्मपरस्थित्या यावदन्ते मनोलयः ॥ ५६ ॥

bhuvanadhvadirupena chintayet kramasho akhilam
sthulasukshmaparasthitya yavadan te manolayah 56

अस्य सर्वस्य विश्वस्य पर्यन्तेषु समन्ततः ।
अध्वप्रक्रियया तत्त्वं शैवं ध्यात्वा महोदयः ॥ ५७ ॥

asya sarvasya vishvasya paryanteshu samantatah
adhvaprakriyay a tattvam shaivam dhyatva mahodayah 57

विश्वमेतन्महादेवि शून्यभूतं विचिन्तयेत् ।
तत्रैव च मनो लीनं ततस्तल्लयभाजनम् ॥ ५८ ॥

vishvam etan mahadevi shunyabhutam vichintayet
tatraiva cha mano linam tatas tallayabhajanam 58

घटादिभाजने दृष्टिं भित्तिस्त्यक्त्वा विनिक्षिपेत् ।
तल्लयं तत्क्षणाद्गत्वा तल्लयात्तन्मयो भवेत् ॥ ५९ ॥

ghatadibhajane drishtim bhittis tyaktva vinikshipet
tallayam tatkshanad gatva tallayat tanmayo bhavet 59

निर्वृक्षगिरिभित्त्यादिदेशे दृष्टिं विनिक्षिपेत् ।
विलीने मानसे भावे वृत्तिक्षीणः प्रजायते ॥ ६० ॥

nirvrikshagiribhittyadideshe drishtim vinikshipet
viline manase bhave vrittikshinah prajayate 60

उभयोर् भावयोर् ज्ञाने ध्यात्वा मध्यं समाश्रयेत् ।
युगपच् च द्वयं त्यक्त्वा मध्ये तत्त्वं प्रकाशते ॥ ६१ ॥

ubhayor bhavayor jnane dhyatva madhyam samashrayet
yugapac cha dvayam tyaktva madhye tattvam prakashate 61

भावे त्यक्ते निरुद्धा चिन् नैव भावान्तरं व्रजेत् ।
तदा तन्मध्यभावेन विकसत्यति भावना ॥ ६२ ॥

bhave tyakte niruddha chin naiva bhavantar am vrajet
tada tanmadhyabhavena vikasatyati bhavana 62

सर्वं देहं चिन्मयं हि जगद् वा परिभावयेत् ।
युगपन् निर्विकल्पेन मनसा परमोदयः ॥ ६३ ॥

sarvam deham chinmayam hi jagad va paribhavayet
yugapan nirvikalpena manasa paramodayah 63

वायुद्वयस्य संघट्टाद् अन्तर् वा बहिर् अन्ततः ।
योगी समत्वविज्ञानसमुद्गमनभाजनम् ॥ ६४ ॥

vayudvayasya samghattad antar va bahir antatah
yogi samatvavijnanasamudgamanabhajanam 64

सर्वं जगत् स्वदेहं वा स्वानन्दभरितं स्मरेत् ।
युगपत् स्वामृतेनैव परानन्दमयो भवेत् ॥ ६५ ॥

sarvam jagat svadeham va svanandabharitam smaret
yugapat svamritenaiva paranandamayo bhavet 65

कुहनेन प्रयोगेण सद्य एव मृगेक्षणे ।
समुदेति महानन्दो येन तत्त्वं प्रकाशते ॥ ६६ ॥

kuhanena prayogena sadya eva mrigekshane
samudeti mahanando yena tattvam prakashate 66

सर्वस्रोतो निबन्धेन प्राणशक्त्योर्ध्वया शनैः ।
पिपीलिकास्पर्शवेलायां प्रथते परमं सुखम् ॥ ६७ ॥

sarvasroto nibandhena pranashaktyordhvaya shanaih
pipilika sparsha velayam prathate paramam sukham 67

वह्नेर् विषस्य मध्ये तु चित्तं सुखमयं क्षिपेत् ।
केवलं वायुपूर्णं वा स्मरानन्देन युज्यते ॥ ६८ ॥

vahner vishasya madhye tu chittam sukhamayam kshipet
kevalam vayupurnam va smaranandena yujyate 68

शक्तिसंगमसंक्षुब्धशक्त्यावेशावसानिकम् ।
यत् सुखं ब्रह्मतत्त्वस्य तत् सुखं स्वाक्यम् उच्यते ॥ ६९ ॥

shaktisamgamasamkshubdhashaktyaveshavasanikam
yat sukham brahmatattvasya tat sukham svakyam uchyate 69

लेहनामन्थनाकोदैः स्त्रीसुखस्य भरात् स्मृतेः ।
शक्त्यभावेऽपि देवेशि भवेद् आनन्दसम्प्लवः ॥ ७० ॥

lehanamanthanakotaih strisukhasya bharat smriteh
shaktyabhave api deveshi bhaved anandasamplavah 70

आनन्दे महति प्राप्ते दृष्टे वा बान्धवे चिरात् ।
आनन्दम् उद्गतं ध्यात्वा तल्लयस् तन्मना भवेत् ॥ ७१ ॥

anande mahati prapte drishte va bandh ave chirat
anandam udgatam dhyatva tallayas tanmana bhavet 71

जग्धिपानकृतोल्लासरसानन्दविजृम्भणात् ।
भावयेद् भरितावस्थां महानन्दस् ततो भवेत् ॥ ७२ ॥

jagdhipanakritollasarasanandavijrimbhanat
bhavayed bharitavastham mahanandas tato bhavet 72

गीतादिविषयास्वादासमसौख्यैकतात्मनः ।
योगिनस् तन्मयत्वेन मनोरूढेस् तदात्मता ॥ ७३ ॥

gitadivishayasvadasamasaukhyaikatatmanah
yoginas tanmayatvena manorudhes tadatmata 73

यत्र यत्र मनस् तुष्टिर् मनस् तत्रैव धारयेत् ।
तत्र तत्र परानन्दस्वरूपं सम्प्रवर्तते ॥ ७४ ॥

yatra yatra manas tushtir manas tatraiva dharayet
tatra tatra paranandasvarupam sampravartate 74

अनागतायां निद्रायां प्रणष्टे बाह्यगोचरे ।
सावस्था मनसा गम्या परा देवी प्रकाशते ॥ ७५ ॥

anagatayam nidrayam pranashte bahyagochare
savastha manasa gamya para devi prakashate 75

तेजसा सूर्यदीपादेर् आकाशे शबलीकृते ।
दृष्टिर् निवेश्या तत्रैव स्वात्मरूपं प्रकाशते ॥ ७६ ॥

tejasa suryadipader akashe shabalikrite
drishtir niveshya tatraiva svatmarupam prakashate 76

करङ्किण्या क्रोधनया भैरव्या लेलिहानया ।
खेचर्या दृष्टिकाले च परावाप्तिः प्रकाशते ॥ ७७ ॥

karankinya krodhanaya bhairavya lelihanaya
khecharya drishtikale cha paravaptih prakashate 77

मृद्वासने स्फिजैकेन हस्तपादौ निराश्रयम् ।
निधाय तत्प्रसङ्गेन परा पूर्णा मतिर् भवेत् ॥ ७८ ॥

mridvasane sphijaikena hastapadau nirashrayam
nidhaya tatprasangena para purna matir bhavet 78

उपविश्यासने सम्यग् बाहू कृत्वार्धकुञ्चितौ ।
कक्षव्योम्नि मनः कुर्वन् शमम् आयाति तल्लयात् ॥ ७९ ॥

upavishyasane samyag bahu kritvardhakunchitau
kakshavyomni manah kurvan shamam ayati tallayat 79

स्थूलरूपस्य भावस्य स्तब्धां दृष्टिं निपात्य च ।
अचिरेण निराधारं मनः कृत्वा शिवं व्रजेत् ॥ ८० ॥

sthularupasya bhavasya stabdham drishtim nipatya cha
achirena niradharam manah kritva shivam vrajet 80

मध्यजिह्वे स्फारितास्ये मध्ये निक्षिप्य चेतनाम्।
होच्चारं मनसा कुर्वंस् ततः शान्ते प्रलीयते॥ ८१ ॥

madhyajihve spharitasye madhye nikshipya chetanam
hoccaaram manasa kurvams tatah shante praliyate 81

आसने शयने स्थित्वा निराधारं विभावयन्।
स्वदेहं मनसि क्षिणे क्षणात्क्षीणाशयो भवेत्॥ ८२ ॥

asane shayane sthitva niradharam vibhavayan
svadeham manasi kshine kshanat kshinashayo bhavet 82

चलासने स्थितस्याथ शनैर् वा देहचालनात्।
प्रशान्ते मानसे भावे देवि दिव्यौघमाप्नुयात्॥ ८३ ॥

chalasane sthitasyatha shanair va dehachalanat
prashante manase bhave devi divyaugham apnuyat 83

आकाशं विमलम् पश्यन् कृत्वा दृष्टिं निरन्तराम्।
स्तब्धात्मा तत्क्षणाद् देवि भैरवं वपुर् आप्नुयात्॥ ८४॥

akasham vimalam pashyan kritva drishtim nirantaram
stabdhatma tatkshanad devi bhairavam vapur apnuyat 84

लीनं मूर्ध्नि वियत्सर्वम् भैरवत्वेन भावयेत्।
तत्सर्वम् भैरवाकारतेजस्तत्त्वं समाविशेत्॥ ८५॥

linam murdhni viyatsarvam bhairavatvena bhavayet
tatsarvam bhairavakaratejastattvam samavishet 85

किञ्चिज् ज्ञातं द्वैतदायि बाह्यालोकस् तमः पुनः।
विश्वादि भैरवं रूपं ज्ञात्वानन्तप्रकाशभृत्॥ ८६॥

kinchij jnatam dvaitadayi bahyalokas tamah punah
vishvadi bhairavam rupam jnatvanantaprakashabhrit 86

एवम् एव दुर्निशायां कृष्णपक्षागमे चिरम्।
तैमिरम् भावयन् रूपम् भैरवं रूपम् एष्यति॥ ८७॥

evam eva durnishayam krishnapakshagame chiram
taimiram bhavayan rupam bhairavam rupam eshyati 87

एवम् एव निमील्यादौ नेत्रे कृष्णाभमग्रतः।
प्रसार्य भैरवं रूपम् भावयंस् तन्मयो भवेत्॥ ८८॥

evam eva nimilyadau netre krishnabham agratah
prasarya bhairavam rupam bhavayams tanmayo bhavet 88

यस्य कस्येन्द्रियस्यापि व्याघाताच् च निरोधतः।
प्रविष्टस्याद्वये शून्ये तत्रैवात्मा प्रकाशते॥ ८९॥

yasya kasyendriyasyapi vyaghatach cha nirodhatah
pravishtasyadvaye shunye tatraivatma prakashate 89

अबिन्दुमविसर्गं च अकारं जपतो महान्।
उदेति देवि सहसा ज्ञानौघः परमेश्वरः॥ ९०॥

abindum avisargam cha akaram japato mahan
udeti devi sahasa jnanaughah parameshvarah 90

वर्णस्य सविसर्गस्य विसर्गान्तं चितिं कुरु।
निराधारेण चित्तेन स्पृशेद् ब्रह्म सनातनम्॥ ९१॥

varnasya savisargasya visargantam chitim kuru
niradharena chittena sprished brahma sanatanam 91

व्योमाकारं स्वमात्मानं ध्यायेद् दिग्भिर् अनावृतम्।
निराश्रया चितिः शक्तिः स्वरूपं दर्शयेत्तदा॥ ९२॥

vyomakaram svamatmanam dhyayed digbhir anavritam
nirashraya chitih shaktih svarupam darshayet tada 92

किञ्चिद् अङ्गं विभिद्यादौ तीक्ष्णसूच्यादिना ततः।
तत्रैव चेतनां युक्त्वा भैरवे निर्मला गतिः॥ ९३॥

kinchid angam vibhidyadau tikshnasuchyadina tatah
tatraiva chetanam yuktva bhairave nirmala gatih 93

चित्ताद्यन्तःकृतिर् नास्ति ममान्तर् भावयेद् इति ।
विकल्पानामभावेन विकल्पैर् उज्झितो भवेत् ॥ ९४ ॥

chittadyantah kritir nasti mamantar bhavayed iti
vikalpanam abhavena vikalpair ujjhito bhavet 94

माया विमोहिनी नाम कलायाः कलनं स्थितम् ।
इत्यादिधर्मं तत्त्वानां कलयन् न पृथग् भवेत् ॥ ९५ ॥

maya vimohini nama kalayah kalanam sthitam
ityadi dharmam tattvanam kalayan na prithag bhavet 95

झगितीच्चां समुत्पन्नामवलोक्य शमं नयेत् ।
यत एव समुद्भूता ततस् तत्रैव लीयते ॥ ९६ ॥

jhagiticcham samutpannam avalokya shamam nayet
yata eva samudbhuta tatas tatraiva liyate 96

यदा ममेच्चा नोत्पन्ना ज्ञानं वा कस् तदास्मि वै ।
तत्त्वतोऽहं तथाभूतस् तल्लीनस् तन्मना भवेत् ॥ ९७ ॥

yada mamecchа notpanna jnanam va kas tadasmi vai
tattvato aham tathabhutas tallinas tanmana bhavet 97

इच्चायामथवा ज्ञाने जाते चित्तं निवेशयेत् ।
आत्मबुद्ध्यानन्यचेतास् ततस् तत्त्वार्थदर्शनम् ॥ ९८ ॥

icchayam athava jnane jate chittam niveshayet
atmabuddhyananyachetas tatas tattvarthadarshanam 98

निर्निमित्तम् भवेज् ज्ञानं निराधारम् भ्रमात्मकम्।
तत्त्वतः कस्यचिन् नैतद् एवम्भावी शिवः प्रिये॥ ९९॥

nirnimittam bhavej jnanam niradharam bhramatmakam
tattvatah kasyachin naitad evambhavi shivah priye 99

चिद्धर्मा सर्वदेहेषु विशेषो नास्ति कुत्रचित्।
अतश्च तन्मयं सर्वम् भावयन् भवजिज् जनः॥ १००॥

chiddharma sarvadeheshu visesho nasti kutrachit
atas cha tanmayam sarvam bhavayan bhavajij janah 100

कामक्रोधलोभमोहमदमात्सर्यगोचरे ।
बुद्धिं निस्तिमितां कृत्वा तत्तत्त्वमवशिष्यते ॥ १०१ ॥

kama krodha lobha moha mada matsarya gochare
buddhim nistimitam kritva tat tattvam avashishyate 101

इन्द्रजालमयं विश्वं व्यस्तं वा चित्रकर्मवत् ।
भ्रमद् वा ध्यायतः सर्वं पश्यतश्च सुखोद्गमः ॥ १०२ ॥

indrajalamayam vishvam vyastam va chitrakarmavat
bhramad va dhyayatah sarvam pashyatas cha sukhodgamah 102

न चित्तं निक्षिपेद् दुःखे न सुखे वा परिक्षिपेत् ।
भैरवि ज्ञायतां मध्ये किं तत्त्वमवशिष्यते ॥ १०३ ॥

na chittam niksheped duhkhe na sukhe va parikshipet
bhairavi jnayatam madhye kim tattvam avashishyate 103

विहाय निजदेहस्थं सर्वत्रास्मीति भावयन् ।
दृढेन मनसा दृष्ट्या नान्येक्षिण्या सुखी भवेत् ॥ १०४ ॥

vihaya nijadehastham sarvatrasmiti bhavayan
dridhena manasa drishtya nanyekshinya sukhi bhavet 104

घटादौ यच्च विज्ञानमिच्छाद्यं वा ममान्तरे ।
नैव सर्वगतं जातं भावयन्निति सर्वगः ॥ १०५ ॥

ghatadau yach cha vijnanam icchadyam va mamantare
naiva sarvagatam jatam bhavayan iti sarvagah 105

ग्राह्यग्राहकसंवित्तिः सामान्यं सर्वदेहिनाम् ।
योगिनां तु विशेषोऽस्ति सम्बन्धे सावधानता ॥ १०६ ॥

grahyagrahakasamvittih samanyam sarvadehinam
yoginam tu vishesho asti sambandhe savadhanata 106

स्ववदन्यशरीरेऽपि संवित्तिमनुभावयेत् ।
अपेक्षां स्वशरीरस्य त्यक्त्वा व्यापी दिनैर्भवेत् ॥ १०७ ॥

svavad anya sharire api samvittim anubhavayet
apeksham sva sharirasya tyaktva vyapi dinair bhavet 107

निराधारं मनः कृत्वा विकल्पान्न विकल्पयेत् ।
तदात्मपरमात्मत्वे भैरवो मृगलोचने ॥ १०८ ॥

niradharam manah kritva vikalpan na vikalpayet
tadatma paramatmatve bhairavo mrigalochane 108

सर्वज्ञः सर्वकर्ता च व्यापकः परमेश्वरः ।
स एवाहं शिवधर्मा इति दार्ढ्याच्छिवो भवेत् ॥ १०९ ॥

sarvajnash sarvakarta cha vyapakah parameshvarah
sa evaham shivadharma iti dardhyach chhivo bhavet 109

जलस्येवोर्मयो वह्नेर् ज्वालाभङ्ग्यः प्रभा रवेः ।
ममैव भैरवस्यैता विश्वभङ्ग्यो विभेदिताः ॥ ११० ॥

jalasyevormayo vahner jvalabhangyah prabha raveh
mamaiva bhairavasyaita vishvabhangyo vibheditah 110

भ्रान्त्वा भ्रान्त्वा शरीरेण त्वरितं भुवि पातनात् ।
क्षोभशक्तिविरामेण परा सञ्जायते दशा ॥ १११ ॥

bhrantva bhrantva sharirena tvaritam bhuvi patanat
kshobhashakti viramena para sanjayate dasha 111

आधारेष्वथवाशक्त्याज्ञानाच्चित्तलयेन वा ।
जातशक्तिसमावेशक्षोभान्ते भैरवं वपुः ॥ ११२ ॥

adhareshv athavashaktya jnanach chitta layena va
j atashakti samavesha kshobhante bhairavam vapuh 112

सम्प्रदायमिमं देवि शृणु सम्यग् वदाम्यहम् ।
कैवल्यं जायते सद्यो नेत्रयोः स्तब्धमात्रयोः ॥ ११३ ॥

sampradayam imam devi shrinu samyag vadamy aham
kaivalyam jayate sadyo netrayoh stabdhamatrayoh 113

सङ्कोचं कर्णयोः कृत्वा ह्यधोद्वारे तथैव च ।
अनच्चकमहलम् ध्यायन् विशेद् ब्रह्म सनातनम् ॥ ११४ ॥

sankocham karnayoh kritva hy adhodvare tathaiva cha
anachkam ahalam dhyayan vished brahma sanatanam 114

कूपादिके महागर्ते स्थित्वोपरि निरीक्षणात् ।
अविकल्पमतेः सम्यक् सद्यश्चित्तलयः स्फुटम् ॥ ११५ ॥

kupadike mahagarte sthitvopari nir ikshanat
avikalpamateh samyak sadyash chitta layah sphutam 115

यत्र यत्र मनो याति बाह्ये वाभ्यन्तरेऽपि वा ।
तत्र तत्र शिवावस्था व्यापकत्वात् क्व यास्यति ॥ ११६ ॥

yatra yatra mano yati bahye vabhyantare api va
tatra tatra shivavastha vyapakatvat kva yasyati 116

यत्र यत्राक्षमार्गेण चैतन्यं व्यज्यते विभोः ।
तस्य तन्मात्रधर्मित्वाच्चिल्लयाद् भरितात्मता ॥ ११७ ॥

yatra yatrakshamargena chaitanyam vyajyate vibhoh
tasya tanmatra dharmitvach chilla yad bharitatmata 117

क्षुताद्यन्ते भये शोके गह्वरे वा रणाद् द्रुते ।
कुतूहलेक्षुधाद्यन्ते ब्रह्मसत्तामयी दशा ॥ ११८ ॥

kshutad yante bhaye shoke gahvare va ranad drute
kutuhalekshudhadyante brahmasattamayi dasha 118

वस्तुषु स्मर्यमाणेषु दृष्टे देशे मनस्त्यजेत् ।
स्वशरीरं निराधारं कृत्वा प्रसरति प्रभुः ॥ ११९ ॥

vastushu smaryamaneshu drishte deshe manas tyajet
sva shariram niradharam kritva prasarati prabhuh 119

क्वचिद् वस्तुनि विन्यस्य शनैर् दृष्टिं निवर्तयेत् ।
तज्ज्ञानं चित्तसहितं देवि शून्यालयो भवेत् ॥ १२० ॥

kvachid vastuni vinyasya shanair drishtim nivartayet
taj jnanam chitta sahitam devi shunyalayo bhavet 120

भक्त्युद्रेकाद् विरक्तस्य यादृशी जायते मतिः ।
सा शक्तिः शाङ्करी नित्यम् भावयेत् तां ततः शिवः ॥ १२१ ॥

bhaktyudrekad viraktasya yadrishi jayate matih
sa shaktih shankari nityam bhavayet tam tatah shivah 121

वस्त्वन्तरे वेद्यमाने सर्ववस्तुषु शून्यता ।
ताम् एव मनसा ध्यात्वा विदितोऽपि प्रशाम्यति ॥ १२२ ॥

vastvantare vedyamane sarvavastushu shunyata
tam eva manasa dhyatva vidito api prashamyati 122

किञ्चिज्ज्ञैर् या स्मृता शुद्धिः सा शुद्धिः शम्भुदर्शने ।
न शुचिर् ह्यशुचिस् तस्मान् निर्विकल्पः सुखी भवेत् ॥ १२३ ॥

kinchij jnair ya smrita shuddhih sa shuddhih shambhudarshane
na shuchir hy ashuchis tasmad nirvikalpah sukhi bhavet 123

सर्वत्र भैरवो भावः सामान्येष्व् अपि गोचरः ।
न च तद्व्यतिरेकेण परोऽस्तीत्यद्वया गतिः ॥ १२४ ॥

sarvatra bhairavo bhavah samanyeshv api gocharah
na cha tad vyatirekena paro asti ity advaya gatih 124

समः शत्रौ च मित्रे च समो मानावमानयोः ।
ब्रह्मणः परिपूर्णत्वाद् इति ज्ञात्वा सुखी भवेत् ॥ १२५ ॥

samah shatrau cha mitre cha samo manavamanayoh
brahmanah paripurnatvad iti jnatva sukhi bhavet 125

न द्वेषं भावयेत् क्वापि न रागं भावयेत् क्वचित् ।
रागद्वेषविनिर्मुक्तौ मध्ये ब्रह्म प्रसर्पति ॥ १२६ ॥

na dvesham bhavayet kvapi na ragam bhavayet kvachit
ragadveshavinirmuktau madhye brahma prasarpati 126

यद् अवेद्यं यद् अग्राह्यं यच् छून्यं यद् अभावगम् ।
तत् सर्वं भैरवं भाव्यं तदन्ते बोधसम्भवः ॥ १२७ ॥

yad avedyam yad agrahyam yach chhunyam yad abhavagam
tat sarvam bhairavam bhavyam tad ante bodhasambhavah 127

नित्ये निराश्रये शून्ये व्यापके कलनोज्झिते ।
बाह्याकाशे मनः कृत्वा निराकाशं समाविशेत् ॥ १२८ ॥

nitye nirashraye shunye vyapake kalanojjhite
bahyak ashe manah kritva nirakasham samavishet 128

यत्र यत्र मनो याति तत् तत्तेनैव तत्क्षणम् ।
परित्यज्यानवस्थित्या निस्तरङ्गस् ततो भवेत् ॥ १२९ ॥

yatra yatra mano yati tat tat tenaiva tatkshanam
parityajyanavasthitya nistarangas tato bhavet 129

भया सर्वं रवयति सर्वदो व्यापकोऽखिले ।
इति भैरवशब्दस्य सन्ततोच्चारणाच् छिवः ॥ १३० ॥

bhaya sarvam ravayati sarvado vyapako akhile
iti bhairavashabdasya santatoccharanach chhivah 130

अहं ममेदमित्यादि प्रतिपत्तिप्रसङ्गतः ।
निराधारे मनो याति तद् ध्यानप्रेरणाच् छमी ॥ १३१ ॥

aham mamedam ityadi pratipattiprasangatah
niradhare mano yati tad dhyanapreranach chhami 131

नित्यो विभुर् निराधारो व्यापकश् चाखिलाधिपः ।
शब्दान् प्रतिक्षणं ध्यायन् कृतार्थोऽर्थानुरूपतः ॥ १३२ ॥

nityo vibhur niradharo vyapakash chakhiladhipah
shabdan pratikshanam dhyayan kritartho arth anurupatah
132

अतत्त्वम् इन्द्रजालाभम् इदं सर्वम् अवस्थितम् ।
किं तत्त्वम् इन्द्रजालस्य इति दार्ढ्याच् छमं व्रजेत् ॥ १३३ ॥

atattvam indrajalabham idam sarvam avasthitam
kim tattvam indraj alasya iti dardhyach chhamam vrajet 133

आत्मनो निर्विकारस्य क्व ज्ञानं क्व च वा क्रिया ।
ज्ञानायत्ता बहिर्भावा अतः शून्यम् इदं जगत् ॥ १३४ ॥

atmano nirvikarasya kva jnanam kva cha va kriya
jnanayatta bahirbhava atah shunyam idam jagat 134

न मे बन्धो न मोक्षो मे भीतस्यैता विभीषिकाः ।
प्रतिबिम्बम् इदं बुद्धेर् जलेष्व् इव विवस्वतः ॥ १३५ ॥

na me bandho na moksho me bhitasyaita vibhishikah
pratibimbam idam buddher jaleshv iva vivasvatah 135

इन्द्रियद्वारकं सर्वं सुखदुःखादिसङ्गमम् ।
इतीन्द्रियाणि सन्त्यज्य स्वस्थः स्वात्मनि वर्तते ॥ १३६ ॥

indriyadvarakam sarvam sukhaduhkhadisangamam
iti indriyani santyajya svasthah svatmani vartate 136

ज्ञानप्रकाशकं सर्वं सर्वेणात्मा प्रकाशकः ।
एकम् एकस्वभावत्वाज् ज्ञानं ज्ञेयं विभाव्यते ॥ १३७ ॥

jnanaprakashakam sarvam sarvenatma prakashakah
ekam ekasvabhavatvaj jnanam jneyam vibhavyate 137

मानसं चेतना शक्तिर् आत्मा चेति चतुष्टयम् ।
यदा प्रिये परिक्षीणं तदा तद् भैरवं वपुः ॥ १३८ ॥

manasam chetana shaktir atma cheti chatushtayam
yada priye parikshinam tada tad bhairavam vapuh 138

निस्तरङ्गोपदेशानां शतम् उक्तं समासतः ।
द्वादशाभ्यधिकं देवि यज् ज्ञात्वा ज्ञानविज् जनः ॥ १३९ ॥

nistarangopadeshanam shatam uktam samasatah
dvadashabhyadhikam devi yaj jnatva jnanavij janah 139

अत्र चैकतमे युक्तो जायते भैरवः स्वयम् ।
वाचा करोति कर्माणि शापानुग्रहकारकः ॥ १४० ॥

atra chaikatame yukto jayate bhairavah svayam
vacha karoti karmani shapanugrahakarakah 140

अजरामरतामेति सोऽणिमादिगुणान्वितः ।
योगिनीनां प्रियो देवि सर्वमेलापकाधिपः ॥ १४१ ॥

ajaramaratam eti so animadigunanvitah
yogininam priyo devi sarvamelapak adhipah 141

जीवन्नपि विमुक्तोऽसौ कुर्वन्नपि च चेष्टितं ॥ १४२ ॥

jivann api vimukto asau kurvann api cha chestitam 142

श्रीदेव्युवाच । shri devy uvacha ।

इदं यदि वपुर्देव परायाश्च महेश्वर ॥ १४२ ॥

idam yadi vapur deva parayash cha maheshvara 142

एवमुक्तव्यवस्थायां जप्यते को जपश्च कः ।
ध्यायते को महानाथ पूज्यते कश्च तृप्यति ॥ १४३ ॥

evamuktavyavasthayam japyate ko japash cha kah
dhyayate ko mahanatha pujyate kash cha tripyati 143

हूयते कस्य वा होमो यागः कस्य च किं कथम् ॥ १४४ ॥

huyate kasya va homo yagah kasya cha kim katham 144

श्रीभैरव उवाच । shri bhairava uvacha ।

एषात्र प्रक्रिया बाह्या स्थूलेष्वेव मृगेक्षणे ॥ १४४ ॥

eshatra prakriya bahya sthuleshveva mrigekshane 144

भूयो भूयः परे भावे भावना भाव्यते हि या ।
जपः सोऽत्र स्वयं नादो मन्त्रात्मा जप्य ईदृशः ॥ १४५ ॥

bhuyo bhuyah pare bhave bhavana bhavyate hi ya
japah so atra svayam nado mantratma japya idrishah 145

ध्यानं हि निश्चला बुद्धिर्निराकारा निराश्रया ।
न तु ध्यानं शरीराक्षिमुखहस्तादिकल्पना ॥ १४६ ॥

dhyanam hi nishchala buddhir nirakara nirashraya
na tu dhyanam sharirakshi mukh hastadi kalpana 146

पूजा नाम न पुष्पाद्यैर्या मतिः क्रियते दृढा ।
निर्विकल्पे परे व्योम्नि सा पूजा ह्यादराल्लया ॥ १४७ ॥

puja nama na pushpadyair ya matih kriyate dridha
nirvikalpe pare vyomni sa puja hy adara laya 147

अत्रैकतमयुक्तिस्थे योत्पद्येत दिनाद्दिनं ।
भरिताकारता सात्र तृप्तिरत्यन्तपूर्णता ॥ १४८ ॥

atraikatamayuktisthe yotpadyeta dinad dinam
bharitakarata satra triptir atyantapurnata 148

महाशून्यालये वह्नौ भूताक्षविषयादिकं ।
हूयते मनसा सार्धं स होमश्चेतना स्रुचा ॥ १४९ ॥

mahashuny alaye vahnau bhutakshavishayadikam
huyate manasa sardham sa homash chetana srucha 149

यागोऽत्र परमेशानि तुष्टिरानन्दलक्षणा ।
क्षपणात्सर्वपापानां त्राणात्सर्वस्य पार्वति ॥ १५० ॥

yago atra parameshani tushtir anandalakshana
kshapanat sarvapapanam tranat sarvasya parvati 150

रुद्रशक्तिसमावेशस्तत्क्षेत्रं भावना परा ।
अन्यथा तस्य तत्त्वस्य का पूजा कश्च तृप्यति ॥ १५१ ॥

rudrashaktisamaveshas tat kshetram bhavana para
anyatha tasya tattvasya ka puja kash cha tripyati 151

स्वतन्त्रानन्दचिन्मात्रसारः स्वात्मा हि सर्वतः ।
आवेशनं तत्स्वरूपे स्वात्मनः स्नानमीरितं ॥ १५२ ॥

svatantranandachinmatrasarah svatma hi sarvatah
aveshanam tatsvarupe svatmanah snanam iritam 152

यैरेव पूज्यते द्रव्यैस्तर्प्यते वा परापरः ।
यश्चैव पूजकः सर्वः स एवैकः क्व पूजनं ॥ १५३ ॥

yaireva pujyate dravyais tarpyate va paraparah
yash chaiva pujakah sarvah sa evaikah kva pujanam 153

व्रजेत्प्राणो विशेज्जीव इच्छया कुटिलाकृतिः ।
दीर्घात्मा सा महादेवी परक्षेत्रं परापरा ॥ १५४ ॥

vrajet prano vishej jiva icchaya kutilakritih
dirghatma sa mahadevi parakshetram par apara 154

अस्यामनुचरंस्तिष्ठन्महानन्दमयेऽध्वरे ।
तया देव्या समाविष्टः परं भैरवमाप्नुयात् ॥ १५५ ॥

asyam anucharams tishthan mahanandamaye adhvare
taya devya samavishtah param bhairavam apnuyat 155

षड्शतानि दिवा रात्रौ सहस्राण्येकविंशतिः ।
जपो देव्याः समुद्दिष्टः प्राणस्यान्ते सुदुर्लभः ॥ १५६ ॥

shatshatani diva ratrau sahasrany ekavimshatih
japo devyah samuddishtah pranasya ante sudurlabhah 156

इत्येतत्कथितं देवि परमामृतमुत्तमं ।
एतच्च नैव कस्यापि प्रकाश्यं तु कदाचन ॥ १५७ ॥

ity etat kathitam devi paramamritam uttamam
etach cha naiva kasyapi prakashyam tu kadachana 157

परशिष्ये खले क्रूरेऽभक्ते गुरुपादयोः ।
निर्विकल्पमतीनां तु वीराणामुन्नतात्मनां ॥ १५८ ॥

parashishye khale krure abhakte gurupadayoh
nirvikalpamatinam tu viranam unn atatmanam 158

भक्तानां गुरुवर्गस्य दातव्यं निर्विशङ्कया ।
ग्रामो राज्यं पुरं देशः पुत्रदारकुटुम्बकं ॥ १५९ ॥

bhaktanam guruvargasya datavyam nirvishankaya
gramo rajyam puram deshah putradarakutumbakam 159

सर्वमेतत्परित्यज्य ग्राह्यमेतन्मृगेक्षणे ।
किमेभिरस्थिरैर्देवि स्थिरं परमिदं धनं ॥ १६० ॥

sarvam etat parityajya grahyam etan mrigekshane
kim ebhir asthirair devi sthiram param idam dhanam 160

प्राणा अपि प्रदातव्या न देयं परमामृतं ॥ १६१ ॥

prana api pradatavya na deyam paramamritam 161

श्रीदेव्युवाच । shri devy uvacha

देवदेव महादेव परितृप्तास्मि शङ्कर ॥ १६१ ॥

devadeva mahadeva paritriptasmi shankara 161

रुद्रयामलतन्त्रस्य सारमद्यावधारितं ।
सर्वशक्तिप्रभेदानां हृदयं ज्ञातमद्य च ॥ १६२ ॥

rudrayamalatantrasya saram ady avadh aritam
sarvashaktiprabhedanam hridayam jnatam adya cha 162

इत्युक्त्वानन्दिता देवी कण्ठे लग्ना शिवस्य तु ॥ १६३ ॥

ity uktvanandita devi kanthe lagna shivasya tu 163

॥इति विज्ञानभैरवतन्त्रं समाप्तं ॥

iti vijnanabhairavatantram samaptam

***

ॐ तत् सत्

॥ इति विज्ञानभैरवतन्त्रं समाप्तम् ॥

May the timeless wisdom of the Vijnanabhairava inspire self-knowledge, freedom, inner peace, and spiritual realization.

This edition is shared freely for the benefit of all.

Everyone is welcome to read, copy, share, print, translate, adapt, and distribute this edition freely.

लोकाः समस्ताः सुखिनो भवन्तु ।

*May all beings everywhere*
*be happy and free.*

---

Kedi Ganapati
MKG Digital University of Sanatan Dharma
First Digital Edition, 2026